Roll No. ..............................

# D–3328

## B. A. (Classics) (Part I) EXAMINATION, 2020

SAHITYAM

**(Optional)**

Paper First

*Time : Three Hours* ]                    [ *Maximum Marks : 75*

सूचना : सर्वे प्रश्नाः समाधेयाः।

1. कयोश्चिद् द्वयोः कारिकयोः व्याख्या सम्पादनीया— 20

(i) विभक्त्युपत्तये योग्यः शास्त्रीयः शब्द इष्यते।
रूढयौगिकतन्मिश्रैः प्रभेदैः स पुनस्त्रिधा॥

(ii) प्रतिषेधः प्रशिद्धानां कारणानामनादरः।
न युद्धेन भ्रुवो स्पन्देनैव वीरा निपातिताः॥

(iii) रसाद्यनुचिते वर्णे प्रतिकूलाक्षरं विदुः।
न मामङ्गद जानासि रावणं रण दारुणम्॥

(iv) उल्लसत्तनुतां नीतेऽनन्ते पुलककण्टकैः।
भीतया मानवत्यैव त्रियाश्लिष्टं हरिं स्तुमः॥

P. T. O.

2. कयोश्चिद् द्वयोः लक्षणं विलिख्य व्याख्यायताम्— 20

(i) काव्यस्वरूपम्

(ii) निहितार्थ दोषः

(iii) हेतुलक्षणम्

(iv) श्लेष गुणः

3. कयोश्चिद् द्वयोः गद्यांशयोः सप्रसङ्गं व्याख्या समुपस्थापनीया—20

(i) अहा चिररात्राय सुप्तोऽहम्, स्वप्नजालपरतन्त्रणैव महान् पुण्यमयः समयोऽतिवाहितः सन्ध्योपासन समयोऽयमत्मद्गुरु- वरणानाम्, तत्सपरि अर्वाचनोऽमि कुसुमानि इति चिन्तयन् कदलीदलमेकमाकुञ्च्य, तृणशकलैः सन्धाय पुटकं विधाय पुष्पावचयं कर्तुमारेभे।

(ii) गौरसिंहः—कुतो रे! यवनकुलकलंक!

यवनयुवकः—आः! वयमपि कुत इति प्रष्टव्याः। भारतीयकन्दरिकन्दरेष्वपि वयं विचरामः, शृङ्गलाङ्गूलविहीनानां हिन्दुपदव्यवहार्याणाञ्च युष्मादृक्षाणां पशूनामाखेट क्रीडया रमामहे।

गौरसिंहः—(सक्रोधं विहस्य) वयमपि स्वाङ्कागतसत्ववृत्तयः शिवस्यगणाः अत्रैव निवसामः तत्सुप्रभातमद्य स्वयमेव त्वं दीर्घदावदहने पतङ्गायितोऽसि।

(iii) संन्यासी—तद यदि त्वं मां प्रविशन्तं प्रतिरुन्धे तदधुनैव परिष्कृतं पारदभस्मं तुभ्यं दद्याम् यथा त्वं गुञ्जामात्रेणापि द्वापञ्चाशतसङ्ख्याकतुलापरिमितं ताम्रं जाम्बूनदं विधातुं शक्नुयाः।

दौवारिकः—हं हो! कपट संन्यासिन्! कथं विश्वासघातं स्वामीवञ्चनञ्च शिक्षयसि ? ते केचनान्ये भवन्ति जारजाताः, ये उत्कोच लोभेन स्वामिनं वञ्चयित्वा आत्मानमन्धतमसे पातयन्ति, न वयं शिवगणास्तादृशा।

(संन्यासिनो हस्तं धृत्वा) इतस्तु सत्यं कथय कस्त्वं ? कुतः आयातः ? केन वा प्रेषितः ?

(iv) ततस्तु इतोऽश्वात् शिववीरः तत तु शिविकातोऽफजलखानः अपि युगपदेवावातरताम्, परस्परं साक्षात्कृत्य च, उभावप्युत्सुकाभ्याम्यां नयनाभ्याम्, सत्वाराभ्यां पादाभ्याम्, स्वाङ्गताम्रेऽनतत्परेण वदनेन आश्लेषाय प्रसारिताभ्यां च हस्ताभ्यां कौशयास्तरण विरोचितायां बर्हिवेदिकायां धावमानौ परस्पर मालिलिङ्गतुः।

शिववीरस्तु आलिङ्गनच्छलेनैव स्वहस्ताभ्यां तस्य स्कन्धौ दृढगृहीत्वा सिंहनखैर्जत्रुणी कन्धरां च व्यपाहयत्। रुधिरदिग्ध च तच्छरीरं कटिप्रदेशे समुत्तोल्य भूपृष्ठे पोथयत्।

4. शिवराजविजयस्य प्रथम निःश्वासस्य कथासारो लेख्यः। 15

अथवा

शिवराजविजये यवनानां त्रासं वर्णयत।

अथवा

गद्यकाव्यस्य इतिहासं विकासं च लिखत।